# .. shrIgAyatrI kavacham ..

## ॥ श्रीगायत्री कवचम् ॥

श्रीगणेशाय नमः ।
याज्ञवल्क्य उवाच ।
स्वामिन् सर्वजगन्नाथ संशयोऽस्ति महान्मम ।
चतुःषष्ठिकलानां च पातकानां च तद्वद ॥
मुच्यते केन पुण्येन ब्रह्मरूपं कथं भवेत् ।
देहश्च देवतारूपो मन्त्ररूपो विशेषतः ॥
ब्रह्मोवाच ।
क्रमतः श्रोतुमिच्छामि कवचं विधिपूर्वकम् ।
ॐ अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः ।
ऋग्यजुःसामाऽथर्वाणि छन्दांसि ।
परब्रह्मस्वरूपिणी गायत्री देवता ।
भूः बीजम् ।भुवः शक्तिः ।स्वः कीलकम् ।
श्रीगायत्रीप्रीत्यर्थे जपे विनियोगः ।
ॐ भूर्भुवः स्वः तत्सवितुरिति हृदयाय नमः ।
ॐ भूर्भुवः स्वः वरेण्यमिति शिरसे स्वाहा ।
ॐ भूर्भुवः स्वः भर्गो देवस्येति शिखायै वषट् ।
ॐ भूर्भुवः स्वः धीमहीति कवचाय हुम् ।
ॐ भूर्भुवः स्वः धियो यो नः इति नेत्रत्रयाय वौषट् ।
ॐ भूर्भुवः स्वः प्रचोदयादिति अस्त्राय फट् ।
अथ ध्यानम् ।
मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशां शुभ्रं कपालं गुणं
शंख, चक्रमथारविन्दुयुगलं हस्तैर्वहन्तीं भजे ॥
ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ।
ब्रह्मविद्या तु मे पश्चादुत्तरे मां सरस्वती ॥१॥
पावकीं च दिशं रक्षेत्पावकोज्ज्वलशालिनी ।
यातुधानीं दिशं रक्षेद्यातुधानगणार्दिनी ॥२॥
पावमानीं दिशं रक्षेत्पवमानविलासिनी ।
दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी ॥३॥
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ।
एवं दश दिशो रक्षेत्सर्वतो भुवनेश्वरी ॥४॥

RUPNATHJI( DR.RUPAK NATH)

तत्पदं पातु मे पादौ जंघे मे सवितुः पदम् ।
वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च ॥ ५ ॥

देवस्य मे तु हृदयं धीमहीति गलं तथा ।
धियो मे पातु जिह्वायां यः पदं पातु लोचने ॥ ६ ॥

ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात् ।
तद्वर्णः पातु मूर्द्धानं सकारः पातु भालकम् ॥ ७ ॥

चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तु कारकः ।
नासापुटे वकारो मे रेकारस्तु कपोलयोः ॥ ८ ॥

णिकारस्त्वधरोष्ठे च यंकारस्त्वधरोष्ठके ।
आस्यमध्ये भकारस्तु र्गोकारश्चिबुके तथा ॥ ९ ॥

देकारः कण्ठदेशे च वकारः स्कन्धदेशयोः ।
स्यकारो दक्षिणं हस्तं धीकारो वामहस्तके ॥ १० ॥

---

मकारो हृदयं रक्षेद्धिकारो जठरं तथा ।
धिकारो नाभिदेशं तु योकारस्तु कटिद्वयम् ॥ ११ ॥

गुह्यं रक्षतु योकार ऊरु मे नः पदाक्षरम् ।
प्रकारो जानुनी रक्षेच्चोकारो जंघदेशयोः ॥ १२ ॥

दकारो गुल्फदेशं तु यात्कारः पादयुग्मकम् ।
जातवेदेति गायत्री त्र्यम्बकेति दशाक्षरा ॥ १३ ॥

सर्वतः सर्वदा पातु आपोज्योतीति षोडशी ।
इदं तु कवचं दिव्यं बाधाशतविनाशकम् ॥ १४ ॥

चतुःषष्ठिकलाविद्यासकलैश्वर्यसिद्धिदम् ।
जपारम्भे च हृदयं जपान्ते कवचं पठेत् ॥ १५ ॥

स्त्रीगोब्राह्मणमित्रादिद्रोहाद्यखिलपातकैः ।
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥ १६ ॥

॥ इति श्रीमद्वसिष्ठसंहितायां गायत्रीकवचं सम्पूर्णम् ॥

RUPNATHJI(DR.RUPAK NATH)